देशः। यथा, रामायणे। २। ८५। ५।
"अब्रवीत् प्राञ्जलिर्भूत्वा गुहो गहनगोचरः॥"
"गहनं वनं गोचरो देशो यस्य सः।" इति तट्टीकाक्रद्रामानुजः॥) जन्मराश्यवधियहाक्रान्तराशीनां संज्ञा। यथा,—
"गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः॥"
अपि च।
"अष्टवर्गशुभैः श्रीमान् कर्म्म कुर्य्यान्नभश्चरैः।
गोचरस्थैस्तदप्राप्तौ तदप्राप्तौ तु वेधगैः॥"
गोचरशुद्धिर्यथा,—
"केतूपप्लवभौममन्दगतयः षष्ठत्रिसंस्थाः शुभाश्चन्द्रार्कावपि ते च तौ च दशमौ चन्द्रः पुनः सप्तमः।
जीवः सप्तनवद्विपञ्चमगतो युग्मेषु सोमात्मजः
शुक्रः षड्दशसप्तवर्जमितरे सर्व्वेऽप्युपान्ते शुभाः॥"
इति दीपिका॥
(अथ ग्रहाणां गोचरगतफलम्। यथा,—
सूर्य्यस्य गोचरफलम्।
"स्थानं जन्मनि नाशयेद्दिनकरः कुर्य्याद्द्वितीये भयम्।
दुश्चिक्ये श्रियमातनोति हिबुके मानक्षयं यच्छति॥
दैन्यं पञ्चमगः करोति रिपुहा षष्ठेऽर्थहा सप्तमे।
पीड़ामष्टमगः करोति नितरां कान्तिक्षयं धर्म्मगः॥
कर्म्मवृद्धिजनकस्तु कर्म्मगो
वित्तवृद्धिकृदथायसंस्थितः।
द्रव्यनाशजनितां महापदं
यच्छति व्ययगतो दिवाकरः॥"
चन्द्रस्य गोचरफलम्।
"जन्मन्यर्थं दिशति हिमगुर्व्वित्तनाशं द्वितीये
दद्यादृव्यं सहजभवने नेत्ररोगं चतुर्थे।
कार्य्यभ्रंशं तनयगृहगो वित्तलाभञ्च षष्ठे
द्यूने द्रव्यं युवतिसहितं म्लत्युसंस्थोऽथ म्लत्युम्॥
नृपभयं कुरुते नवमः शशी
दशमधामगतस्तु महत् सुखम्।
विविधमायगतः कुरुते धनं
व्ययगतस्तु रुजं सधनक्षयम्॥"
मङ्गलस्य गोचरफलम्।
"प्रथमगृहगः क्षौणीसूनुः करोत्यरिजं भयं
क्षपयति धनं वित्तस्थाने तृतीयगतोऽर्थदः।
अरिभयकरः पातालेऽस्मिन् चिणोति च पञ्चमः
रिपुगृहगतो धत्ते वित्तं शुचं मदनस्थितः॥
जनयति मरणस्थः शस्त्रबाधां धराजो
दिशति च नवमस्थो कार्य्यपीड़ामतीव।
शुभमपि दशमस्थो लाभगो भूरिलाभं
व्ययभवनगतोऽसौ चाध्यनर्थार्थनाशान्॥"
बुधस्य गोचरफलम्।
"बुधः प्रथमधामगो दिशति बन्धमर्थं धनं
वधं रिपुभयान्वितं सहजगश्चतुर्थेऽर्थदः।
स्त्रीनष्टितिकरो भवेत्तनयगोऽरिगः स्थानदः
करोति मदनस्थितो बहुविधां शरीरापदम्॥
अष्टमे शशिसुते धनलब्धिर्धर्म्मगोऽतिमहतीं तनुपीड़ाम्।
कर्म्मगः शुभमथायगतोऽर्थं
द्वादशे भवति वित्तविनाशः॥"
गुरोर्गोचरफलम्।
"भयं जन्मन्यार्य्यो जनयति धनस्थोऽर्थमतुलं
तृतीयेऽङ्गक्लेशं दिशति च चतुर्थेऽर्थविलयम्।
शुभं पुत्त्रस्थानेऽशुभमपि च कुर्य्यादरिगृहे
गुरुर्द्यूने पूजां धननिचयनाशञ्च निधने॥
धर्म्मगतो धनवृद्धिकरः स्यात्
प्रीतिहरो दशमेऽमरपूज्यः।
स्थानधनानि ददाति स चाये
द्वादशगस्तनुमानसपीड़ाम्॥"
शुक्रस्य गोचरफलम्।
"जन्मन्यतिक्षयकरो भृगुजोऽर्थदोऽर्थे
दुश्चिक्यगः शुभकरो धनदश्चतुर्थे।
स्यात् पुत्त्रदस्तनयगोऽरिगतोऽरिवृद्धिं
शोकप्रदो मदनगो निधनेऽर्थदाता॥
जनयति विविधाम्बराणि धर्म्मे
न शुभकरो दशमस्थितस्तु शुक्रः।
धननिचयकरस्तु लाभसंस्थो
व्ययभवनेऽपि धनागमं करोति॥"
शनेर्गोचरफलम्।
"वित्तभ्रंशं सदाहं दिनकरतनयो जन्मराशिं प्रपन्नश्चित्तक्लेशं द्वितीये रिपुहननकृतं वित्तलाभं तृतीये।
पाताले शत्रुवृद्धिं सुतभवनगतः पुत्त्रभृत्यादिनाशं
षष्ठस्थानेऽर्थलाभं जनयति मदने दोषसङ्घातमार्त्तिं॥
शरीरपीड़ां निधनेऽथ धर्म्मे
धनक्षयं कर्म्मणि दौर्म्मनस्यम्।
उपान्त्यगो वित्तमनर्थमन्त्ये
शनिर्ददातीत्यवदत् सुवृत्तः॥"
राहोर्गोचरफलम्।
"जन्मान्त्यार्थनवसुरत्त्यनवद्विसप्तराशौ स्थिते यदि भवेदसुरः कदापि।
अर्थक्षयं रिपुभयं बहुकार्य्यहानिं
रोगप्रवासमरणाग्निभयं करोति॥"
केतोर्गोचरफलम्।
"एकादशत्रिदशषष्ठगते नराणां
सम्मानभोगनृपमानसुखार्थदाता।
आज्ञाकराश्च पुरुषाः प्रमदाश्च नित्यं
सौख्योदयं दिशति पुत्त्रचयञ्च केतुः॥"
अन्यत्सर्व्वं ग्रहशब्दे द्रष्टव्यम्॥)
गोचर्म्म, [न्] क्ली, (गोश्चर्म्म।) गवां त्वक्। कर्म्मविशेषे तद्दानविधिर्यथा,—
"मेषासनन्तु वश्यार्थमाकृष्टौ व्याघ्रचर्म्म च।
शान्तौ मृगाजिनं शस्तं मोक्षार्थं व्याघ्रचर्म्म च॥
गोचर्म्मस्तम्भने देवि। सम्भवे वाजिचर्म्म च॥"
इति समयाचारतन्त्रे २ पटलः॥ *॥
परिमाणविशेषः। यथा,—
"यत् किञ्चित् कुरुते पापं ज्ञानतोऽज्ञानतोऽपि वा।
अपि गोचर्म्ममात्रेण भूमिदानेन शुध्यति॥"
गोचर्म्मलक्षणञ्च वृहस्पतिना दर्शितम्। यथा,—
"सप्तहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्त्तनम्।
दश तान्येव गोचर्म्म दत्त्वा स्वर्गे महीयते॥"
इति मिताक्षरायां आचाराध्यायः॥
गोच्छालः, पुं, (गां भूमिं छादयतीति। छद + णिच् + अण्। पृषोदरादित्वात् साधुः।) कुलाहलवृक्षः। इति रत्नमाला॥ कोकशिमा इति भाषा॥
गोजलं, क्ली, (गवि जातं जलम्।) गोमूत्रम्। इति राजनिर्घण्टः॥ (यथा, गारुडे १८० अध्याये।
"गोजलेनैव पूरेण कर्णस्रावो विनश्यति॥")
गोजा, स्त्री, (गवि पृथिव्यां जायते इति। गो + जन् + "जनसनखनक्रमगमो विट्।" ३।२।६७। इति विट्। "विड्वनोरिति।" ६।४।४१। इति आत्वञ्च।) गोलोमिकावृक्षः। इति राजनिर्घण्टः॥
गोजागरिकं, क्ली, (गोषु इन्द्रियेषु जागरः अप्रमादोऽस्यास्य ठन्।) मङ्गलम्। इति मेदिनी। के। २२७॥
गोजागरिकः, पुं, (गवि पृथिव्यां जागरिकः प्रहरीव। अस्त्रवत्कण्टकान्वितत्वादस्य तथात्वम्।) कण्टकारिका। इति मेदिनी। के। २२७॥
गोजापर्णी, स्त्री, (गोजं दुग्धं तद्वत् आपर्णयति शुक्लवर्णो भवतीति। आ + पर्णि + अच्। गौरादित्वात् ङीष्।) दुग्धफेनीवृक्षः। इति राजनिर्घण्टः॥
गोजिह्वा, स्त्री, (गोर्जिह्वेव।) क्षुपविशेषः। गोजियालता इति दारियाशाक इति च भाषा। तत्पर्य्यायः। दार्व्विका २। इत्यमरः। २।४। ११६॥ दर्व्विका ३। इति भरतः॥ दार्व्विपत्रिका ४। इति रत्नमाला॥ खरपत्री ५ वातोना ६ अधोमुखा ७ अनड्वुज्जिह्वा ८ अधःपुष्पी ९ दर्व्वी १० गोजिह्विका ११। इति शब्दरत्नावली॥ अपि च भावप्रकाशे।
"गोजिह्वा गोजिका गोभी दार्व्विका खरपर्णिनी।
गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत्॥
हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः।
कोमला तुवरी तिक्ता स्वादुपाकरसा स्मृता॥"
अस्या गुणाः। कटुत्वम्। तीक्ष्णत्वम्। शीतलत्वम्। पित्तसर्व्वदन्तविषार्त्तिनाशित्वम्। व्रणसंरोपणत्वञ्च। इति राजनिर्घण्टः॥ (अस्या व्यवहारो यत्र तद्यथा,—
"सोमवल्क्योऽश्वकर्णश्च गोजिह्वा हंसपद्यपि।
रजन्यौ गैरिकं लेपो नखदन्तविषापहः॥"
इति वैद्यकचक्रपाणिसंग्रहे विषाधिकारे॥)
गवेधुका। इति रत्नमाला॥ गड़गड़ इति भाषा॥
गोजिह्विका, स्त्री, (गोर्जिह्वेव गोजिह्वा स्वार्थे कन्। अत इत्वञ्च।) गोजिह्वा लता। इति शब्दरत्नावली॥